चौरादुपानं विनिहन्त्यवश्यं
शूलं प्रवृद्धं परिणामसंज्ञम् ॥"
इति पिप्पलीघृतम् ॥ * ॥
"मण्डूरं शोधितं पश्चाल्लौहणं वा गुडेन तु ।
भक्षयन्मुच्यते शूलात् परिणामसमुद्भवात् ॥
संशोध्य चूर्णितं कृत्वा मण्डूरस्य पलाष्टकम् ।
शतावरीरसस्याष्टौ दध्नश्च पयसस्तथा ॥
पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः ।
विपचेत् सर्व्वमेकेध्यं यावत् पिण्डत्वमागतम् ॥
सिद्धन्तु भक्षयेन्मध्ये भोजनस्याग्रतोऽपि वा ।
वातात्मकं पित्तभवं शूलञ्च परिणामजम् ॥
निहन्त्येव हि योगोऽयं मण्डूरस्य न संशयः ॥"
इति शतावरीमण्डूरम् ॥ * ॥
इति वैद्यकचक्रपाणिसंग्रहे शूलाधिकारे ॥
"अजीर्णान्नरसः प्रोक्तो दग्धमः परिणामजः ।"
"जीर्णेऽन्ने च भवेद्यस्तु स ज्ञेयः परिणामजः ॥"
"लङ्घनं वमनञ्चैव विरेकश्चानुवासनम् ॥
निरूहो वस्ति कर्म्माणि परिणामे त्रिदोषजे ।
चित्रकं त्रिवृता दन्ती विडङ्गं कटुकत्रयम् ॥
समं चूर्णं गुडेनाथ कारयेन्मोदकान् सुधीः ।
भक्षयेत् प्रातरुत्थाय पश्चादुष्णोदकं पिबेत् ॥
परिणामोद्भवं शूलं हन्ति शीघ्रं नरस्य च ।
यवानीहिङ्गु सिन्धूत्थक्षारं सौवर्च्चलाभया ।
सुरामण्डेन पातव्या परिणामे त्रिदोषजे ॥
हिङ्ग्वोषवचाजमोदहवुषा पथ्यायवानी शठी
जातीपिप्पलीदाडिमष्टकोतिन्तिडिचव्याग्नि-
कम् ।
तस्मादम्लसुवर्च्चला च यवजक्षारं तथा सर्ज्जिका
सिन्धूत्थं विड्चूर्णकं समकृतं स्याद्बीजपूरे रसे ॥
संभाव्यं सुकृतातपेन गुडिका चाक्षप्रमाणा तथा
कल्को वातविकारिणां प्रददतः शूलाग्नेस्
शीघ्रकान् ॥"
"एष हिङ्ग्वादिको नाम सर्व्वशूलार्त्तिनाशनः ।
सर्व्ववातविकारघ्नः सर्व्वक्षयनिवारणः ।
परिणामोद्भवं शूलं वारयत्याश्वसंशयम् ॥"
इति हारीते चिकित्सितस्थाने नवमेऽध्याये ॥

परिणायः, पुं, ( परितो वामदक्षिणतो नयनम् । परि+नी+"परिण्योर्नीणोर्द्यूताभ्रेषयोः ।" ३ । ३।३७। इति घञ् ।) शारीणां समन्तान्नयनम् । इत्यमरः । ३ । १० । ४६ ॥ परेरितो दीर्घत्वे परीणायश्च । इति भरतः ॥

परिणाहः, पुं, ( परिणह्यतेऽनेन इति । परि+नह+घञ् । ) विस्तारः । तत्पर्य्यायः । विशालता २ । इत्यमरः । २ । ६ । ११४ ॥ ओसार इति चौड़ा इति च भाषा । ( यथा, महाभारते । ६ । ७ । २२ ।
"अरत्नीनां सहस्रञ्च शतानि दश पञ्च च ।
परिणाहस्तु द्वयस्य फलानां रसभेदिनाम् ॥")

परिणेता, [ ऋ ] पुं, ( परिणयतीति । परि+नी+तृच् । ) वोढ़ा । भर्त्ता २ । इति राजनिर्घण्टः ॥ ( यथा,—
"शिवे दक्षयतो दक्षान् परिनेतुः प्रसक्तये ।
अप्यर्थकामौ तस्याऽऽस्तां धर्म्म एव मनीषिणः ।"
इति रघुः । १ । २५ ।)

परितः [ स् ] अ, ( परि+"पर्य्यभिभ्याञ्च ।" ५ । ३ । ९ । इति तसिल् ।) सर्व्वतः । चतुर्द्दिगभिव्याप्तौ । इत्यमरः ।३।४।१३ ॥ (यथा, रघुः । ६।९।
"पुरोपकण्ठे पवनाश्रयाणां
कलापिनामुद्धतनृत्यहेतौ ।
प्रध्मातशङ्खे परितो दिगन्तान्
तूर्य्यस्वने मूर्च्छति मङ्गलार्थे ॥" )

परितापः, पुं, ( परिसर्व्वतोभावेन तप्यतेऽनेन । परि+तप्+घञ् । ) दुःखम् । ( यथा, भागवते । ७ । ८ । ५२ ।
"स तु जनपरितापं तत्कृतं जानता ते
नरहर उपनीतः पञ्चतां पञ्चविंश ॥" )
नरकान्तरम् । इति मेदिनी ॥ शोकः । इति शब्दरत्नावली ॥ ( यथा, रामायणे ।२।२१।२५।
"एतया तत्त्वया बुद्ध्या संस्तभ्यात्मानमात्मना ।
व्याहृतेऽप्यभिषिक्ते मे परितापो न विद्यते ॥" )
भयम् । कम्पः । इति विश्वः ॥ अतुष्णता च ॥ ( यथा, मार्कण्डेये । १५ । ४८ ।
"परितापश्च गात्रेभ्यः पीड़ावाधाश्च तत्क्षणः ।
अपहन्ति नरव्याघ्र ! दयां कुरु महीपते ! ॥")

परितुष्टः, त्रि, ( परि+तुष्+क्तः । ) परितोषयुक्तः । सन्तुष्टः । यथा,—
"यत् प्रार्थ्यते त्वया भूप ! त्वया च कुलनन्दन !।
मत्तस्तत् प्राप्यतां सर्व्वं परितुष्टा ददामि तत् ॥"
इति मार्कण्डेये देवीमाहात्म्ये । ९३ । १० ॥

परितोषः, पुं, ( परितोषणमिति । परि+तुष्+घञ् ।) सर्व्वतोभावेन तुष्टिः । सन्तोषः । यथा,—
"त्वामुदर ! साधुमन्ये शाके-
रपि यदसि लब्धपरितोषम् ।
हतहृदयं ह्यधिकाधिक-
वाञ्छाशतदुर्भरं न पुनः ॥"
इति शान्तिशतके ॥

परित्यागः, पुं. ( परित्यजनमिति । परि+त्यज्+घञ् । ) सर्व्वतोभावेन वर्ज्जनम् । तत्पर्य्यायः । छोरणम् २ । इति त्रिकाण्डशेषः ॥ * ॥
"गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥"
इति मत्स्यसूक्तम् ॥

परित्राणं, क्ली, ( परित्रायते इति । परि+त्रै+ल्युट् । ) मारणोद्यतस्य निवारणम् । तत्पर्य्यायः । पर्य्याप्तिः २ हस्तवारणम् ३ । इत्यमरः ।३।२।५ ॥ रक्षणम् । यथा,--
"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥"
इति श्रीभगवद्गीतायाम् । ४ । ८ ॥

परिदानं, क्ली, ( परिदीयते इति । परि+दा+भावे ल्युट् । ) परीवर्त्तः । विनिमयः । इत्यमरः । २ । ९ । ८० ॥

परिदायी, [ न् ] पुं, ( परित्यज्य शास्त्रधर्म्मं ददातीति । परि+दा+णिनिः । ) अनूढ़ज्येष्ठे तत्कनिष्ठाय कन्यादाता । "यथा हारीतः । ज्येष्ठेऽनिर्व्विष्टे कनीयान् निर्व्विशन् परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकस्ते सर्व्वे पतिताः ।" इत्युद्वाहतत्त्वम् ॥

परिदेवनं, क्ली, ( परि+दिव+ल्युट् ।) अनुशोचनोक्तिः । विलापः । इत्यमरः । १ । ६ । १६ ॥ ( यथा, महाभारते । १ । २ । १४६ ।
"परिदेवनञ्च माद्र्या वासुदेवस्य सन्निधौ ।
आश्वासनञ्च कृष्णस्य दुःखार्त्तायाः प्रकीर्त्तितम् ॥" )

परिदेवना, स्त्री, ( परिदेवयतीति । परि+दिवि+"ण्यासश्रन्थो युच् ।" ३।३।१०७ । इति युच् । ततष्टाप् ।) शोकनिमित्तो विलापः । यथा,—
"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत !।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥"
इति श्रीभगवद्गीताद्वितीयाध्यायश्लोकव्याख्याने श्रीधरस्वामी ॥ अपि च ।
"न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण च ।
अलभ्यं लभते मर्त्त्यस्तत्र का परिदेवना ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि शौनक !।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥
अयाचितो मया लब्धस्तत्प्रेषितः पुनः कुतः ।
यत्रागतस्तत्र गतस्तत्र का परिदेवना ॥
एकवृक्षे यदा रात्रौ नानापक्षिसमागमः ।
प्रभाते दश दिशो यान्ति तत्र का परिदेवना ॥
एकसार्थप्रयातानां सर्व्वेषान्तत्र गामिनाम् ।
यद्येकस्त्वरितो याति का तत्र परिदेवना ॥"
इति गरुड़पुराणे १११ अध्यायः ॥

परिधानं, क्ली, ( परिधीयते यत् । परि+धा+कर्म्मणि ल्युट् । ) परिधेयवस्त्रम् । तत्पर्य्यायः । अन्तरीयम् २ उपसंव्यानम् ३ अधोंऽशुकम् ४ । इत्यमरः । २ । ६ । ११७ ॥ ( यथा, पञ्चतन्त्रे । ५ । २३ ।
"वरं वनं व्याघ्रगजादिसेवितं
जलेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम् ॥" )

परिधायः, पुं, ( परिधीयतेऽत्र । परि+धा+घञ् । ) जनस्थानम् । परिच्छदः । नितम्बः । इति मेदिनी ॥ ( जनस्थानमित्यत्र जलस्थानमिति केचित् ॥ )

परिधिः, पुं, ( परिधीयतेऽनेन । परि+धा+"उपसर्गे घोः किः ।" ३ । ३ । ९२ । इति किः । ) परिवेशः । चन्द्रसूर्य्यसमीपमण्डलम् । ( यथा, रघुः । ८ । ३० ।
"अतृषत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः ॥" )
यज्ञियतरुशाखा । यज्ञियतरोः पलाशादेर्यज्ञ पशुबन्धनार्थं या शाखा निखायते तस्याम् । इत्यमरभरतौ ॥ (यथाह आपस्तम्बः । "खादिरं पालाशं वैकविंशतिदारुकमिध्मं करोति त्रयः